भस्मस्नानं सप्तविधस्नानान्तर्गताग्नेयस्नानम्। यथा,—
"आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम्।"
इति यामलः ॥
शिवपूजायां ललाटे तस्य धारणमावश्यकम्। यथा,—
"विना भस्मत्रिपुण्ड्रेण विना रुद्राक्षमालया।
पूजितोऽपि महादेवो न स्यात्तस्य फलप्रदः ॥"
इत्याह्निकतत्त्वम् ॥
तेन कांस्यशुद्धिर्यथा,—
"अम्भसा हेमरूप्यायः कांस्यं शुध्यति भस्मना।
अम्लैस्ताम्रञ्च रैत्यञ्च पुनःपाकेन मृण्मयम् ॥"
इति शुद्धितत्त्वम् ॥ * ॥
अश्मरीविकारः। यथा,—
"शर्करासिकतामेहो भस्माख्योऽश्मरीवैकृतम्।
अश्मर्य्याः शर्करा ज्ञेया तुल्यव्यञ्जनवेदना ॥"
इति सुश्रुते निदानस्थाने अश्मरीनिदानम् ॥

भस्मकं, क्ली, (भस्म + संज्ञायां कन्।) रोगभेदः। भस्मकीट इति ख्यातः। विडङ्गः। (यथास्य पर्य्यायः।
"जन्तुघ्नं भस्मकं रेणुः क्रिमिघ्नं चित्रतण्डुलम्।
क्रिमिघ्नन्तु विडङ्गञ्च गर्द्दभं तच्च केवलम् ॥"
इति वैद्यकरत्नमालायाम् ॥)
कलधौतम्। इति मेदिनी। के, १६३ ॥ * ॥
भस्मकस्य निदानसंप्राप्तिपूर्ब्बकं लक्षणमाह।
"कट्वादिरूक्षान्नभुजां नराणां
क्षीणे कफे मारुतपित्तवृद्धौ।
अतिप्रवृद्धः पवनान्वितोऽग्नि-
र्भुक्तं क्षणाद्भस्म करोति यस्मात्।
तस्मादसौ भस्मकसंज्ञकोऽभू-
दुपेक्षितोऽयं पचते च धातून् ॥"
भस्मकस्य सोपद्रवमरिष्टमाह।
"तृट्स्वेददाहमूर्च्छादीन् कृत्वैवात्यग्निसम्भवान्।
पक्वान्नमाशु धात्वादीन् स क्षिप्रं नाशयेद्ध्रुवम् ॥"
इति भावप्रकाशः ॥
(अत्र तीक्ष्णाग्निव्याख्याने विजयेनोक्तम्। तीक्ष्णग्रहणेन भस्मकस्यावरोधः। अत्यन्ततीक्ष्णाग्निरेव हि भस्मकमित्युच्यते ॥ यदुक्तञ्चरके चिकित्सास्थाने ऊनविंशेऽध्याये। भस्मकचिकित्सामाह।
"नरे क्षीणकफे पित्तं कुपितं मारुतानुगम्।
स्वोष्मणा पावकस्थाने बलमग्नेः प्रयच्छति ॥
तथा लब्धबलो देहे विरूक्षे सानिलोऽनलः।
परिभूय पचत्यन्नं तैक्ष्ण्यादाशु मुहुर्मुहुः ॥
पक्त्वान्नं सततं धातून् शोणितादीन् पचत्यपि।
ततो दौर्ब्बल्यमातङ्कान् मृत्युञ्चोपनयेन्नरम् ॥
भुक्तेऽन्ने लभते शान्तिं जीर्णमात्रे प्रताम्यति ॥"
"तमत्यग्निं गुरुस्निग्धशीतमधुरविज्वलैः ॥
अन्नपानैर्नयेच्छान्तिं दीप्तमग्निमिवाम्बुभिः।
मुहुर्मुहुरजीर्णेऽपि भोज्यान्यस्योपहारयेत् ॥
निरिन्धनोऽन्तरं लब्ध्वा यथैनं न विपादयेत्।
पायसं कृशरं स्निग्धं पैष्टिकं गुड़वैकृतम् ॥
अश्नात्तथौदकानूपपिशितानि भृतानि च।
मत्स्यान् विशेषतः स्निग्धान् स्थिरतोयचरांस्तथा ॥
आविकं सभृतं मांसमद्यादत्यग्निनाशनम्।"
"पिबेत् शीताम्बुना सर्पिर्मधूच्छिष्टेन वा युतम्।
गोधूमचूर्णं पयसा ससर्पिष्कं पिबेन्नरः ॥
आनूपरसविद्धान् वा त्रीन् स्नेहांस्तैलवर्ज्जितान्।
गोधूमचूर्णमन्थं वा व्यधयित्वा शिरां पिबेत् ॥"
"श्यामा त्रिवृद्विपक्वं वा पयो दद्याद्विरेचनम्।
असकृत् पित्तशान्त्यर्थं पायसप्रतिभोजनम् ॥
यत्किञ्चिन्मधुरं मेध्यं श्लेष्मलं गुरुभोजनम्।
तदत्यग्निहितं सर्व्वं भुक्त्वा प्रस्वपनं दिवा ॥
कफे वृद्धे जिते पित्ते मारुते चानलः समः।
समधातोः पचत्यन्नं पुष्ट्यायुर्बलवृद्धये ॥")

भस्मकारः, पुं, (भस्म करोतीति। कृ + "कर्म्मण्यण्।" ३।२।१। इति अण्।) रजकः। इति शब्दमाला ॥

भस्मकूटः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"नन्दनात् पूर्व्वभागे तु भस्मकूटो महागिरिः।
यत्र तिष्ठति भूतेशो महादेवो वृषध्वजः ॥"
इति कालिकापुराणे ८१ अध्यायः ॥

भस्मगन्धा, स्त्री, (भस्मन इव गन्धो यस्याः।) रेणुका। इति भावप्रकाशः ॥

भस्मगन्धिका, स्त्री, (भस्मगन्धोऽस्त्यस्या इति। भस्मगन्ध + "अत इनिठनौ।" ५।२।११५। इति ठन्। टाप्।) रेणुकाख्यगन्धद्रव्यम्। इति जटाधरः ॥

भस्मगन्धिनी, स्त्री, (भस्मन इव बाहुल्येन गन्धोऽस्त्यस्या इति। भस्मगन्ध + इनिः। ङीप्।) रेणुकाख्यगन्धद्रव्यम्। इत्यमरः।२।४।१२०॥

भस्मगर्भः, पुं, (भस्म गर्भेऽस्य।) तिनिशवृक्षः। इति राजनिर्घण्टः ॥ (विवरणमस्य तिनिशशब्दे ज्ञातव्यम् ॥)

भस्मगर्भा, स्त्री, (भस्म गर्भेऽस्या इति। टाप्।) कपिलशिंशपा। इत्यमरः।२।४।६३॥ (अस्याः पर्य्यायो यथा, भावप्रकाशे पूर्व्वखण्डे प्रथमे भागे।
"शिंशपा पिच्छिला श्यामा कृष्णसारा च सा गुरुः।
कपिला सैव मुनिभिर्भस्मगर्भेति कीर्त्तिता ॥")
रेणुकानामगन्धद्रव्यम्। इति जटाधरः ॥

भस्मतूलं, क्ली, (भस्म तूलति तूलयति वेति। तूल + क।) ग्रामकूटः। पांशुवर्षणम्। हिमम्। इति मेदिनी। ले, १६८ ॥

भस्मरोहा, स्त्री, (भस्मनि रोहति इति। रुह् + अच्। टाप्।) दग्धावृक्षः। इति राजनिर्घण्टः ॥

भस्मवेधकः, पुं, (भस्म इव वेधकः।) कर्पूरः। इति शब्दरत्नावली ॥

भस्माचलः, पुं, कामरूपस्थपर्व्वतभेदः। यथा,—
"सर्व्वतीर्थजले स्नात्वा स्पृष्ट्वा चन्द्रं सवासवम्।
मणिकर्णेश्वरं दृष्ट्वा मुक्तिर्भस्माचलं गते ॥"
इति श्रीकालिकापुराणे ८१ अध्यायः ॥

भस्माह्वयः, पुं, (भस्म आह्वयते स्पर्द्धते इति। आ + ह्वे + बाहुलकात् शः।) कर्पूरः। इति त्रिकाण्डशेषः ॥ (विषयोऽस्य कर्पूरशब्दे ज्ञातव्यः ॥)

भा, ल ष दीप्तौ। इति कविकल्पद्रुमः ॥ (अदा०-पर०-अक०-अनिट्।) ल, भाति। ष, भा। इति दुर्गादासः ॥

भा, स्त्री, (भा दीप्तौ + "षिद्भिदादिभ्योऽङ्।" ३।३।१०४। इत्यङ्। टाप्।) प्रभा। दीप्तिः। इत्यमरः। १।४।३४॥ (यथा, वाजसनेयसंहितायाम्। ३०।१२।
"भायै दार्व्वाहारमिति ॥")

भाः, [स्] पुं, (भासते इति। भास दीप्तौ + "भ्राजभासधुर्विद्युतोर्जिपॄजुग्रावस्तुवः क्विप्।" ३।२।१७७। इति क्विप्।) सूर्य्यः। इति त्रिकाण्डशेषः ॥ (स्त्री, दीप्तिः। इत्यमरः।१।४।३४॥ यथा, ऋग्वेदे। १।४६।१०।
"अभूदु भा उ अंशवे हिरण्यं प्रति सूर्य्यः ॥")

भाकुटः, पुं, (भया दीप्त्या कुटतीति। कुट + क।) मत्स्यविशेषः। भेकटी इति भाषा ॥ अस्य गुणाः। मधुरत्वम्। शीतत्वम्। वृष्यत्वम् श्लेष्मकारित्वम्। गुरुत्वञ्च। इति राजवल्लभः ॥

भाकूटः, पुं, (भायुक्ताः कूटाः शिखराणि यस्य।) पर्व्वतभेदः। मत्स्यभेदः। इति मेदिनी। टे, ५३॥

भाकोषः, पुं, (भानां दीप्तीनां कोष इव।) सूर्य्यः। इति त्रिकाण्डशेषः ॥

भाक्तं, त्रि, (भक्तिः गौण्यावृत्तिरागतमिति। भक्ति + अण्।) पारिभाषिकम्। गौणम्। लाक्षणिकम्। औपचारिकम्। यथा। "नन्वेवं परत्र सप्तमे मासि क्रियमाणस्य कथं षाण्मासिकत्वम्। इति चेद्भाक्तम्।" इति तिथ्यादितत्त्वम् ॥ (भक्तस्येदमिति तस्येदमित्यण्।) भक्तसम्बन्धिनि च ॥ (भक्तमस्मै दीयते नियुक्तमिति। भक्त + "भक्तादणन्यतरस्याम्।" ४।४।६८। इत्यण्। अन्नेन पोष्ये च ॥)

भाक्तिकः, त्रि, (भक्तमस्मै नियुक्तं दीयते इति। भक्त + "भक्तादणन्यतरस्याम्।" ४।४।६८। इति पक्षे ठक्।) अन्नेन पोष्यः। भक्तमस्मै दीयते। इति सिद्धान्तकौमुदी ॥

भागः, पुं, (भज्यते इति। भज भागसेवयोः + कर्म्मणि घञ्।) अंशः। इत्यमरः।२।६।८६॥ रूप्यार्द्धकः। भाग्यम्। एकदेशः। इति शब्दरत्नावली ॥ राशेस्त्रिंशभागैकभागः। यथा,—
"त्रिंशांशकस्तथा राशेर्भाग इत्यभिधीयते ॥"
इति तिथ्यादितत्त्वधृतविष्णुधर्म्मोत्तरवचनम् ॥ (भज + भावे घञ्। भजनम्। भगानामैश्वर्य्याणां समूहः इति अण्। ऐश्वर्य्यसमूहः ॥)

भागधेयं, क्ली, (भाग एव। भाग + "भागरूपनामभ्यो धेयः।" इति धेयप्रत्ययः। अभिधानात् नपुंसकत्वम्।) भाग्यम्। इत्यमरः।१।४।२८॥